# CONTENTS


- ✦ **Latest CBSE Examination Paper 2018**

**Click Here**

- ✦ **CBSE Marking Scheme 2018**

**Click Here**

Contents

# नवीनतम सी०बी०एस०ई० परीक्षा प्रश्नपत्र (2018)

अवधि : होरात्रयम्

निर्धारित समय : 3 घंटे] [अधिकतम अंक : 80

**सामान्य निर्देशाः**

(*i*) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(*ii*) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(*iii*) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(*iv*) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

## खंडः- 'क'

### अपठितांश - अवबोधनम् (अपठितांश - अवबोधन)

**Unseen Reading Comprehension** **10 अंकाः**

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**

कस्मिंश्चित् ग्रामे कदाचन अशीतिवर्षीयः एको वृद्धः मार्गे आम्रवृक्षान् आरोपयति स्म। तं दृष्ट्वा महानगरात् आगच्छन् कश्चन युवा पृष्टवान् – भो महानुभाव! तव अवस्था प्रायशः अशीतिवर्षीया प्रतीयते। एतत् च स्वाभाविकं यदा एते वृक्षाः फलानि दास्यन्ति, तदा त्वं जीवितो न भविष्यसि। अतः किमर्थम् इमं निष्फलं प्रयासं करोषि? स वृद्धः उक्तवान् – मया साम्प्रतम् इतरैः आरोपितानां वृक्षाणां फलानि खाद्यन्ते। एवं मयापि आरोपितानाम् एतेषां वृक्षाणां फलानि आगामिभविष्यत्काले लोकाः खादेयुः – इत्येतदर्थम् अहम् एतेषाम् आरोपणं करोमि। वस्तुतः मनुष्येण केवलं स्वार्थचिन्तनं न कर्तव्यम्।

**प्रश्नाः**

I. एकपदेनोत्तरत। **[½×4=2]**

एक शब्द में उत्तर दीजिए।

(*i*) कश्चन युवा कुतः आगच्छति स्म?

(*ii*) मनुष्येण केवलं किं न कर्तव्यम्?

(*iii*) 'तरुः' इत्यर्थे कः पर्यायशब्दः अत्र प्रयुक्तः?

(*iv*) 'मृतः' इत्यस्य विपरीतार्थकं पदं किम्?

II. पूर्णवाक्येनोत्तरत। **[2×2=4]**

पूर्ण वाक्य में उत्तर दीजिए।

(*i*) वृद्धः किं विचार्य वृक्षाणाम् आरोपणं करोति स्म?

(*ii*) युवा तं वृद्धं किम् अपृच्छत्?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। [½×4=2]

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

(*i*) 'आरोपयति स्म' इति क्रियापदस्य कर्तृपदं किम्?

(क) युवा (ख) वृद्धः (ग) वृक्षाः (घ) लोकाः

(*ii*) 'प्रयासम्' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम्?

(क) प्रायशः (ख) निष्फलम् (ग) युवा (घ) साम्प्रतम्।

(*iii*) 'अधुना' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(क) स्वाभाविकम् (ख) साम्प्रतम् (ग) एवम् (घ) युवा।

(*iv*) 'वृद्धः' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) जीवितः (ख) लोकाः (ग) युवा (घ) मया।

IV. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। [2]

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।

## खंडः- 'ख'

### रचनात्मककार्यम् (रचनात्मक - कार्य)

### Writing Skills 15 अंकाः

**2. सखीं प्रति लिखितम् अधः पत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत।** **[½×10=5]**

सखी को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुनः लिखिए।

शिमलानगरात्

दिनाङ्कः ................

प्रिये शकुन्तले!

सप्रेम (*i*) ............।

अद्यैव तव पत्रं प्राप्तम्। तव अर्धवार्षिकीपरीक्षा (*ii*) ............। त्वं च परीक्षापरिणामं (*iii*) ............। अत्रान्तरे, त्वं (*iv*) ............ आगच्छ। अत्र शैत्यं प्रवृद्धम्। (*v*) ............ प्रारम्भे हिमपातः (*vi*) ............। यदा हिमपातो भवति, तदा वृक्षाः वनस्पतयः, राजमार्गाः श्वेतवर्णवस्त्रैः आच्छादिताः इव (*vii*) ............ शोभन्ते। देशस्य विभिन्नभागेभ्यः (*viii*) ............ एतद् द्रष्टुम् अत्र आगच्छन्ति। मम गृहे सर्वे (*ix*) ............ वीक्ष्य प्रसन्नाः भविष्यन्ति। आशासे त्वं नूनम् आगमिष्यसि। गृहे सर्वेभ्यः मम प्रणामाञ्जलयः (*x*) ............।

तव अभिन्नहृदया

प्रियंवदा

**मञ्जूषा**

| |
|---|
| निवेदनीयाः, पर्यटकाः, त्वाम्, नमो-नमः, सम्पन्ना, अतीव, प्रतीक्षसे, सम्भाव्यते, शिमलानगरम्, आगामिमासस्य। |

**३. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन पञ्च वाक्यानि संस्कृतेन लिखत। [2×5=10]**



**मञ्जूषा**

| |
|---|
| व्याधः, तण्डुलान्, प्रसार्य, जालम्, प्रासारयत्, वने, वृक्षाः, कपोताः, मिलित्वा, आदाय, नभसि, उड्डीय, अन्यत्र, धावति, नष्टम्। |

**अथवा/OR**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।**

**[2×5=10]**

**'स्वतन्त्रता-दिवसः'**

**मञ्जूषा**

| |
|---|
| अगस्तमासे, पञ्चदशे, दीर्घकालिक परतन्त्रतानन्तरम्, मुख्यसमारोहः, राजधान्याम्, रक्तदुर्गप्राचीरे, राष्ट्रियध्वजः, प्रधानमन्त्री, विद्यालयीयछात्राः, वातावरणम्, राज्यानां राजधानीषु, अभिवादनम्, आयोज्यते, राष्ट्रियसम्बोधनम्। |

## खंडः- 'ग'

### अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

**Applied Grammar** **25 अंकाः**

**4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।** **[1×4=4]**

(*i*) अस्य नाटकस्य नै + अकः कः अस्ति?

(*ii*) मदोद्धताः कपयः अवदन्।

(*iii*) तस्य राज्ञः एक + छत्रं राज्यम् आसीत्।

(*iv*) कृष्णः चलति कुरुक्षेत्रे।

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[1×4=4]**

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए।

(क) अद्य राष्ट्रपतेः भवने संस्कृतविदुषां सम्मानसमारोहः आयोज्यते।

(*i*) राष्ट्रपतिनिवासे

(*ii*) राष्ट्रपतीयभवने

(*iii*) राष्ट्रपतिभवने।

(ख) कदापि अनृतं न वक्तव्यम्।

(*i*) न ऋतम्

(*ii*) अनृ + क्त

(*iii*) ऋत + न।

(ग) माता-पितरौ प्रणम्य परीक्षाभवनं गच्छ।

(*i*) माता च पितरौ च

(*ii*) माता च पिता च

(*iii*) मातरौ च पितरौ च।

(घ) एतद् आचरणं साधुजनस्य रूपस्य योग्यं नास्ति।

(*i*) रूपयोग्यम्

(*ii*) रूपस्य निकटे

(*iii*) अनुरूपम्।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** **[1×4=4]**

निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति-प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए।

(क) आपद्गतेनापि एतद् अस्त्रं मानवेषु 'न' <u>प्र + युज् + तव्यत्</u>।

(*i*) प्रयोजनीयम्

(*ii*) प्रयोक्तव्यम्

(*iii*) प्रयुक्तम्।

(ख) भवान् जानाति द्रौणेः <u>चपलाम्</u> प्रकृतिम्।

(*i*) चपल + टाप्

(*ii*) चपल + ला

(*iii*) चपल + आम्।

(ग) यथासमयं सर्वेषां <u>महत्त्वं</u> विद्यते।

(*i*) महत् + त्व

(*ii*) महान् + त्वम्

(*iii*) महत् + तु।

(घ) <u>धैर्यवान्</u> जनः लोके पराभवं न प्राप्नोति।

(*i*) धैर्य + मतुप्

(*ii*) धैर्य + क्तवतु

(*iii*) धैर्य + शानच्।

**7. अधोलिखितं संवादं मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत। [1×3=3]**

अधोलिखित संवाद को मञ्जूषा में दिए गए शब्दों की सहायता से वाच्य परिवर्तन करते हुए संपूर्ण संवाद पुनः लिखिए।

रमेशः – किम् अशोकः पाठं पठति?

सुधा – आम्, अशोकेन (*i*) ............ पठ्यते।

सुधाकरः – किं दिनेशः अध्यापकं नमस्करोति?

अशोकः – आम्, (*ii*) ............ अध्यापकः नमस्क्रियते।

शिक्षकः – किं तव माता आपणात् फलानि आनयति?

छात्रः – आम्, मम मात्रा आपणात् फलानि (*iii*) ............।

**मञ्जूषा**

| |
|---|
| आनीयन्ते, दिनेशेन, पाठः। |

**8. अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूर्यन्ताम्। [½×4=2]**

अधोलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए।

(*i*) मम भ्राता प्रातः <u>5.00</u> भ्रमणार्थं गच्छति।

(*ii*) अहं प्रातः <u>8.30</u> कार्यालयं गच्छामि।

(*iii*) तव माता मध्याह्ने <u>2.00</u> विद्यालयात् आगच्छति।

(*iv*) मम जनकः सायं <u>7.30</u> गृहं प्राप्नोति।

**9. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत।** **[1×4=4]**

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए अव्यय पदों के द्वारा कीजिए।

(*i*) किं त्वम् ............ वाराणसीं गमिष्यसि?

(*ii*) प्रातः कालः संजातः, ............ निद्रा न युज्यते।

(*iii*) सः सर्वं वृत्तान्तं निवेद्य सकरुणम् ............ अक्रन्दत्।

(*iv*) अश्वाः प्राणत्राणाय ............ अधावन्।

**मञ्जूषा**

| |
|---|
| इतस्ततः, अपि, उच्चैः, सम्प्रति |

**10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत।** **[1×4=4]**

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है। अशुद्ध पद को संशोधित कर लिखिए।

(*i*) द्वे बालिके विद्यालयं <u>गच्छति</u>।

(*ii*) किम् अहं <u>सर्वे</u> पुस्तकानि आदाय गच्छानि?

(*iii*) विजयः भ्रमणार्थं श्वः न <u>गच्छति</u>।

(*iv*) किं शकुन्तला अध्ययने <u>रतः</u> अस्ति?

## <u>खंडः- 'घ'</u>

**पठित-अवबोधनम् (पठित - अवबोधन)**

**Reading Comprehension** **30 अंकाः**

**11. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

निम्नलिखित गद्यांश, पद्यांश और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।

(अ) **गद्यांशः**

राजा उवाच – भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम् – 'किं करवाणि?'

विप्रः उवाच – यदि भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि, येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत् – लोके चक्षुर्दानं दुष्करम् एव। नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात्। अथवा भवतु नाम। इति विचार्य राजा अभाषत – भो मित्र! किमेकेन चक्षुषा। अहं भवते चक्षुर्द्वयमेव प्रयच्छामि।

**प्रश्नाः**

I. एकपदेन उत्तरत। **[1×2=2]**

एक शब्द में उत्तर दीजिए।

(*i*) 'लोके चक्षुर्दानं दुष्करमेव' इति कः अचिन्तयत्?

(*ii*) राजा कम् अनुगृहीतं कर्तुम् इच्छति?

II. पूर्णवाक्येनोत्तरत। **[2×1=2]**

पूर्ण वाक्य में उत्तर दीजिए।

विप्रः राजानं किम् उक्तवान्?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। **[½×4=2]**

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

(क) अनुच्छेदे 'लोकयात्रा' इत्यस्य किं विशेषणम्?

(*i*) प्रीतः

(*ii*) निर्बाधा

(*iii*) चक्षुर्द्वयम्।

(ख) 'उवाच' इति क्रियापदस्य कर्तृपदं किम्?

(*i*) विप्रः

(*ii*) याचकः

(*iii*) राजा।

(ग) 'तव' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(*i*) भवते

(*ii*) मम

(*iii*) विप्रः।

(घ) 'मम लोकयात्रा' इत्यत्र 'मम' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(*i*) राज्ञे

(*ii*) विप्राय

(*iii*) लोकाय।

**(ब) पद्यांशः**

चञ्चलं हि मनः कृष्णः! प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

**प्रश्नाः**

I. एकपदेन उत्तरत। **[1×2=2]**

एक शब्द में उत्तर दीजिए।

(*i*) कस्य निग्रहम् अर्जुनः सुदुष्करं कथयति?

(*ii*) चञ्चलं किम् अस्ति?

II. पूर्णवाक्येनोत्तरत। **[2×1=2]**

पूर्ण वाक्य में उत्तर दीजिए।

मनः कीदृशम् भवति?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। **[½×4=2]**

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

(क) श्लोके 'अतिकठिनम्' इत्यर्थे किं पर्यायपदं प्रयुक्तम्?

(*i*) चञ्चलम्

(*ii*) प्रमाथि

(*iii*) सुदुष्करम्।

(ख) 'मन्ये' इति क्रियापदस्य कर्तृपदं किम्?

(*i*) कृष्णः

(*ii*) मनः

(*iii*) अहम्।

(ग) 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(*i*) श्रीकृष्णाय

(*ii*) अर्जुनाय

(*iii*) मनसे।

(घ) 'स्थिरम्' इत्यत्र किं विलोमपदम् अत्र प्रयुक्तम्?

(*i*) प्रमाथि

(*ii*) दृढम्

(*iii*) चञ्चलम्।

**(स) नाट्यांशः**

हिमांशुः – अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः।

पर्यटनाधिकारी – शोभनम्। उचितम् उक्तम्। हिमाद्रितुङ्गशृङ्गैः सुशोभिता सूर्योदयभूमिः इयम्। अतः अरुणाचलः। अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति। विपुला च अत्र वनसम्पदा। वनौषधीनां तु अयं स्रोत एव। पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः। शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि।

**प्रश्नाः**

I. एकपदेन उत्तरत। **[1×2=2]**

एक शब्द में उत्तर दीजिए।

(*i*) अस्मिन् प्रदेशे कति नद्यः प्रवहन्ति?

(*ii*) कस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति?

II. पूर्णवाक्येनोत्तरत। **[2×1=2]**

पूर्ण वाक्य में उत्तर दीजिए।

अयं प्रदेशः अरुणाचलः कुतः कथ्यते?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। **[½×4=2]**

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

(क) 'स्पृशति' इति क्रियापदस्य कर्तृपदं किम्?

(*i*) हिमांशुः

(*ii*) पर्यटनाधिकारी

(*iii*) प्रकाशः।

(ख) 'हिमालय' इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम्?

(*i*) सूर्योदयभूमिः

(*ii*) हिमाद्रि

(*iii*) स्रोतः।

(ग) 'दूषित' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(*i*) समृद्धिः

(*ii*) मनोहरा

(*iii*) शुद्ध।

(घ) 'अयं स्रोत एव' इत्यत्र 'अयम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(*i*) सूर्योदयाय

(*ii*) बनौषधिभ्यः

(*iii*) अरुणाचलाय।

**12. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **[1×4=4]**

रेखांकित पदों के आधार पर प्रश्न-निर्माण कीजिए।

(*i*) <u>शक्रस्य</u> प्रभावेण तस्य एकः चक्षुः प्रतिष्ठितम्।

(*ii*) बोधिसत्त्वः <u>शिवीनां</u> राजा बभूव।

(*iii*) हा हन्त! अवधीरिताः <u>अस्माभिः</u> गुरुजनोपदेशाः।

(*iv*) मौनं धृत्वा <u>मीनान्</u> क्रूरतया भक्षयसि।

**13. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत।** **[½×8=4]**

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोकों के अन्वय को पूर्ण कीजिए।

(*i*) शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।

कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥

अन्वयः – यः (*i*) ............... प्राक् (*ii*) ............... वेगम् इह एव (*iii*) ............... शक्नोति सः (*iv*) ............... युक्तः सः सुखी (भवति)।

(*ii*) धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन।

निधानतां याति हि दीयमानम्, अदीयमानं निधनैकनिष्ठम्॥

अन्वयः – निःसारलघोः (*i*) ............... स सारः यत् (*ii*) ............... दीयते। दीयमानं (धनं) (*iii*) ............... याति (*iv*) ............... (धनम्) निधनैकनिष्ठं भवति।

**मञ्जूषा**

| |
|---|
| अदीयमानम्, नरः, लोकहितोन्मुखेन, सोढुम्, निधानताम्, शरीरविमोक्षणात्, धनस्य, कामक्रोधोद्भवम्। |

**14. रेखांकित पदानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत।** **[1×4=4]**

रेखांकित पदों का समुचित भाव-विकल्पों में से चुनकर लिखिए।

(क) स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।

(*i*) साहित्यम्

(*ii*) वाचिकम्

(*iii*) वाक्युक्तम्।

(ख) शुश्रूषा श्रवणं चैव ग्रहणं धारणं यथा।

(*i*) श्रोतुम् इच्छा

(*ii*) सेवा

(*iii*) श्वश्रूः।

(ग) समाः द्वादशः पर्जन्यः तद् राष्ट्रं नाभिवर्षति।

(*i*) मेघः

(*ii*) परितः

(*iii*) पश्यतः।

(घ) तदा तस्य पुरतः देवराजः शक्रः उपस्थितः।

(*i*) शारदा

(*ii*) इन्द्रः

(*iii*) शिल्पम्।

Contents

अंक-योजना (Marking Scheme) X Class 2018 संस्कृतम् ( Sanskrit) 122(**Code 52**)

1। कुछ प्रश्नों के विकल्पात्मक उत्तर भी हो सकते हैं। इस अंक योजना में दिए गए उत्तर निदर्शनात्मक हैं। इनके अतिरिक्त भी संदर्भानुसार सही उत्तर हो सकते हैं, अतः अंक दिए जाएँ।

2। अनुच्छेद अथवा श्लोकों पर आधारित प्रश्न अवबोधनात्मक हैं। विद्यार्थी अनुच्छेद में दिए गए शब्दों के स्थान पर पर्यायवाची शब्दों का प्रयोग भी कर सकते हैं इसके लिए भी अंक दिए जाएँ। विद्यार्थी उत्तर देते समय उपयुक्त विभक्ति अथवा वचन का प्रयोग नहीं करते तो अंशतः अंक काटे जाएँ संपूर्ण नहीं।

3। त्रुटिपूर्ण वर्तनी अथवा व्याकरणात्मक प्रयोगों के लिए अनुपाततः अंक काटे जाएँ न कि पूरे अंक।

4। आंशिक दृष्टि से सही उत्तरों के लिए भी अंशतः अंक अवश्य दिए जाएँ।

5। खण्ड ख में (रचनात्मकं कार्यम्) के अन्तर्गत चित्र वर्णन व 'अनुच्छेद लेखन में विकल्प समझा जाए। बच्चों ने जो भाग भी किया हो अंक दिए जाएँ। वाक्य संरचना प्रमुख है न कि वाक्य का सौंदर्य तत्त्व। आंशिक वाक्य-शुद्धता के लिए भी अंक दिए जाएँ।

**खण्डः 'क' (Section-A)(अपठित अवबोधनम्) 10 अङ्काः**

1 I एकपदेन उत्तरत। प्रत्येक भाग के लिए ½ अंक। ½×2=2

(i) महानगरात् (ii) स्वार्थचिन्तनम् (iii) वृक्षः (iv) जीवितः

II पूर्णवाक्येन उत्तरत - दो प्रश्न । प्रत्येक भाग के लिए 2 अंक। 2×2=4

(i) "मया .... .... करोमि" । (ii) भो महानुभाव !.... ....प्रतीयते।

III प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत- चार प्रश्न ।प्रत्येक भाग के लिए ½ अंक। ½×4=2

(i) **ख** वृद्धः (ii) **ख** निष्फलम् (iii) **ख** साम्प्रतम् (iv) **ग** युवा

IV **स्वार्थचिन्तनम्/ कर्त्तव्यपालनम्/** अथवा अन्य उपयुक्त शीर्षक 2

**खण्डः 'ख' (Section-B)(रचनात्मकं कार्यम्) 15 अङ्काः**

2 पत्रलेखनम् - 10 रिक्तस्थान ।प्रत्येकभाग के लिए ½ अंक। ½×10=5

(i) नमो नमः (ii)सम्पन्ना (iii)प्रतीक्षसे (iv)शिमलानगरम् (V)आगामिमासस्य
(vi) सम्भाव्यते (vii)अतीव (viii) पर्यटकाः (ix) त्वाम् (x) निवेदनीयाः

3 **चित्रवर्णनम्** 2×5=10

बच्चों से सरल,संक्षिप्त वाक्य पूर्ति अपेक्षित है। केवल वाक्य की शुद्धता देखी जाए। इस प्रश्न का प्रमुख उद्देश्य वाक्य रचना है। वाक्य लघु अथवा दीर्घ हो यह महत्वपूर्ण नहीं। व्याकरणिक दृष्टि से शुद्ध होने पर पूर्ण अंक दिए जाएँ ।मंजूषा में दिए गए शब्द सहायतार्थ हैं,बच्चे शब्द चुने अथवा नहीं -आवश्यक नहीं। वे स्वयं शब्दों का प्रयोग कर वाक्य -निर्माण कर सकते हैं। बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियाँ आदि भी बदल सकते हैं अतः अंक दिए जाएँ। त्रुटियों के अंक अंशतः काटे जाएँ। पूर्णतया शुद्ध होने पर ही 10 अंक दिए जाएँ। प्रत्येक वाक्य के लिए 2 अंक हैं।

अथवा (OR) **अनुच्छेदलेखनम्**

यह विकल्प **सबके लिए** दिया गया है। बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियाँ आदि बदल सकते हैं। अंक दिए जाएँ। इस प्रश्न के 10 अंक हैं। प्रत्येक वाक्य के लिए 2 अंक हैं।

**खण्डः 'ग' (Section-C)(अनुप्रयुक्त व्याकरणम्) 25 अङ्काः**

4 **संधि-संधिच्छेद** -आंशिक दृष्टि से सही उत्तर के लिए आंशिक अंक अवश्य दिए जाएँ। प्रत्येक के लिए 1 अंक है। 1×4=4

(i) नायकः (ii) मद+उद्धताः (iii) एकच्छत्रं (iv) कृष्णश्च / उत्तर लिखने के लिए अंक दिए जाएँ

5 **समास** - इस प्रश्न का मूल उद्देश्य समस्तपद अथवा विग्रह की समझ है। प्रत्येक के लिए 1 अंक है। 1×4=4

**क** (iii) राष्ट्रपतिभवने **ख** (i) न ऋतम् **ग** (ii) माता च पिता च **घ** (iii) अनुरूपम्

6 **प्रकृति -प्रत्यय** - बच्चे केवल उत्तर लिख सकते हैं। अतः पूर्ण अंक दिए जाएँ। प्रत्येक भाग के लिए 1 अंक। 1×4=4

**क** (ii) प्रयोक्तव्यम् **ख** (i) चपल + टाप् **ग** (i) महत्+ त्व **घ** (i) धैर्य + मतुप्

7 **वाच्य परिवर्तन-** बच्चे केवल उत्तर लिख सकते हैं। अतः पूर्ण अंक दिए जाएँ। प्रत्येक भाग के लिए 1 अंक 1×3=3

(i) पाठः (ii) दिनेशेन (iii) आनीयन्ते

8 **समय** संबंधी इस प्रश्न में प्रत्येक रिक्तस्थान के लिए ½ अंक है। **½×4=2**

(i) पञ्च (वादने) (ii) सार्ध-अष्ट (वादने) (iii) द्वि (वादने) (iv) सार्ध-सप्त (वादने)

9 **अव्यय** संबन्धी इस प्रश्न में प्रत्येक रिक्तस्थान के लिए 1 अंक है। **1×4=4**

(i) अपि (सम्प्रति) (ii) सम्प्रति (iii) उच्चैः (iv) इतस्ततः

10 **अशुद्धि शोधन** संबन्धी इस प्रश्न में प्रत्येक भाग के लिए 1 अंक है। **1×4=4**

(i) गच्छतः (ii) सर्वाणि (iii) गमिष्यति (iv) रता

## खण्डः 'घ' (Section-D)(पठित-अवबोधनम्) 30 अङ्काः

11 इस प्रश्न का मूल उद्देश्य **अवबोधन** परीक्षण है। बच्चे **पर्यायवाची** शब्दों का प्रयोग कर सकते हैं। पूर्ण अंक दिए जाएँ। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ।

गद्यांशः I) एकपदेन उत्तरत - (i) राजा (ii) आत्मानम् **1×2=2**

II) पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए 2 अंक। **2×1=2**

यदि भवान् प्रीतः...इच्छामि।

III) यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। **½×4=2**

**क** (ii) निर्बाधा **ख** (i/iii) विप्रः/राजा **ग** (ii) मम **ख** (iv) विप्राय

पद्य I) एकपदेन उत्तरत - **1×2=2**

(i) मनसः (ii) मनः

II) पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए 2 अंक। **2×1=2**

मनः.... चञ्चलं/प्रमाथि/बलवत् /दृढम्...।

III) यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। **½×4=2**

**क** (iii) सुदुष्करम् **ख** (iii) अहम् **ग** (ii) अर्जुनाय **ख** (ii) चञ्चलम्

नाट्यांशः I) एकपदेन उत्तरत - (i) पञ्चाशदधिकाः (ii) सूर्यस्य/ अरुणस्य **1×2=2**

II) पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए 2 अंक। **2×1=2**

.... अस्य प्रकाशः...। **अथवा** .... हिमाद्रितुङ्गश्रृङ्गैः...।

III) यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। **½×4=2**

**क** (iii) प्रकाशः **ख** (ii) हिमाद्रिः **ग** (iii) शुद्ध- **घ** (ii) अरुणाचलाय

12 **प्रश्ननिर्माण-संबंधी** इस प्रश्न में बच्चे केवल प्रश्नवाचक शब्द लिख सकते हैं। व्याकरण वर्तनी आदि की दृष्टि से अनुपाततः अंक काटे जाएँ न कि पूर्ण। इस प्रश्न में अववोधन प्रमुख है तथा विकल्पात्मक उत्तर हो सकते हैं। **1×4=4**

(i) कस्य (ii) केषाम् (iii) कैः/ काभिः (iv) कान्

13 **अन्वय-संबंधी** इस प्रश्न में बच्चे मञ्जूषा से उत्तर चुन सकते हैं। बच्चे केवल उत्तर लिख सकते हैं। **½×8=4**

(i) (i) शरीरविमोक्षणात् (ii) कामक्रोधोद्भवम् (iii) सोढुम् (iv) नरः

(ii) (i) धनस्य (ii) लोकहितोन्मुखेन (iii) निधानताम् (iv) अदीयमानम्

14 **भाव -संबंधी** इस प्रश्न में बच्चे केवल क्रमसंख्या लिख सकते हैं अंक दिए जाएँ। वर्तनी आदि की दृष्टि से अंक अंशतः ही काटे जाएँ। प्रत्येक भाग के लिए 1 अंक **1×4=4**

**क** (ii) वाचिकम् **ख** (i) श्रोतुम् इच्छा **ग** (i) मेघः **घ** (ii) इन्द्रः